International Journal of Literacy and Education 2024; 4(1): 250-254

International Journal of Literacy and Education

**E-ISSN:** 2789-1615
**P-ISSN:** 2789-1607
**Impact Factor: RJIF** 5.7
IJLE 2024; 4(1): 250-254
www.educationjournal.info
Received: 15-02-2024
Accepted: 20-03-2024

**Prahallad Mishra**
Department of Sanskrit,
Guest Faculty at Kalahandi
University, Odisha, India

**Corresponding Author:**
**Prahallad Mishra**
Department of Sanskrit,
Guest Faculty at Kalahandi
University, Odisha, India

# अभिज्ञानशाकुन्तले नाट्यतत्वानां विवेचनम्

**Prahallad Mishra**

## प्रस्तावना

संस्कृतसाहित्यवाङ्मयस्य वरेण्यः वाणीसाधकः महाकविकालिदासः सर्वातिशयित्वेन विलसति । संस्कृतसाहित्ये यावन्तो नाट्यकाराः प्रयतन्ते तेषु कालिदासस्य स्थानं सर्वोच्चमिति निश्चयेन वक्तुं पार्यते । कालिदासस्य तिस्रः नाटककृतयः प्रसिद्धास्तत्रापि तेषु अभिज्ञानशाकुन्तलमं महाकविकालिदासेन विरचितमेकं बहु प्रसिद्धं नाटकम् अस्ति। अस्य नाटकस्य नायकः दुष्यन्तः नायिका शकुन्तला चास्ति। दुष्यन्तः शकुन्तलया सह गान्धर्वविवाहं कृतवान्, तदा सः स्मृतिचिह्नं नाम अङ्गुयलीयकं दत्तवान् । तत् दुष्यन्तेनापमानिता गर्भवती सा मारीचाश्रमे निवसन्ति भरतनामकं पुत्रमजनयत् । केनचित् धिवरेण तदङ्गुलीयकमभिधानं दुष्यन्तः लब्धवान् । तद् दृष्टा एव संपूर्ण पूर्ववृत्तं स्मृतवान् । विरहशोकाकुलः सः शकुन्तलाम् स्मृतवान् । विरहशोकाकुलः सः शकुन्तलाम् स्मृतवान्। अनन्तरं देवासुरसंग्रामात् प्रत्यावर्तनकाले तत्राश्रमे गतवान् । तत्र भरतेन सह शकुन्तला मिलितवती । नाटकस्यास्य विश्वसाहित्येऽत्यधिकं महत्वं वर्तते । अतः साहित्यसमीक्षकाः कथयन्ति यत् _

काव्येषु नाटकं रम्यं तत्र रम्या शकुन्तला ।
तत्रापि चतुर्थोऽङ्कः तत् श्लोकचतुष्टयम् ।।

कालिदासो महाभारतस्य कथामाश्रित्य शाकुन्तलं नाम नाटकं प्रणीतवान् । कालिदासः स्वीये शाकुन्तले सौन्दर्यभावनायां रससिद्धौ च पुरा सिद्धि प्राप्तवान्। यत्र कालिदासीयनाटकेषु पात्राणि जीवनशक्तिसम्पन्नानि, उपमाः स्थानीयशोभावर्धनायेव विन्यस्ताश्च भवन्ति तत्रैव हृदयपक्षोऽपि नानादरभाजनतां नीयते । अभिज्ञानशाकुन्तले महाकविकालिदासः नाट्यतत्वानां यथोचितं प्रयुक्तं कृतमस्ति । अतः संस्कृतवाङ्मये अभिज्ञानशाकुन्तलं नाटकं एकं पूर्णाङ्गं नाटकरूपेण सुप्रसिद्धः। तत् नाट्यतत्वानाम् एकमध्ययनमत्र क्रियते-

विशिष्टालङ्कारिकः साहित्यदर्पणाकारः विश्वनाथकविराजस्य नाटकलक्षणानुसारं नाटके यानि तत्त्वानि स्युः ते सर्वाणि कालिदासस्य अभिज्ञानशाकुन्तले यथा विधिः सन्निवेशितः अभवत् । यथा -

एकं पूर्णाङ्गं नाटकम् अभिज्ञानशाकुन्तलम् ।

महाकविकालिदासेन विरचितः अभिज्ञानशाकुन्तलं नाटकम् एकं पूर्णाङ्गं नाटकरूपेण सुप्रसिद्धा वर्तते। अतः कथ्यते –

"काव्येषु नाटकं रम्यं तत्र रम्या शकुन्तला " अस्य पूर्णाङ्गत्वस्य कारणानि भवन्ति यथा

ख्यातवृत्तम्

नाटकस्य लक्षणनुसारम् नाटकस्य ख्यातवृत्तम् वा इतिवृत्तः कश्चित् वेदः पुराणः, रामायणः महाभारतः प्रभृतिः इतिहास प्रसिद्धः कथा भवेत् । इदमनुसारम् अभिज्ञानशाकुन्तलम् नाटकस्य इतिवृत्तः वा कथावस्तुः पुराणप्रसिद्धः दुष्यन्तशकुन्तलयोः प्रणयकथाया परिपृष्टः । इदं कथा महाभारते पद्मपुराणे अपि च वर्णितः भवन्ति।१

पञ्चसन्धि

आलङ्कारिकाणां मतानुसारं नाटके पञ्चसन्धिः भवन्ति यथा – मुखसन्धिः प्रतिमुखसन्धिः, गर्भसन्धिः, विमर्शसन्धिः, निर्वह सन्धिः च । अभिज्ञानशाकुन्तलनाटके एतानि पञ्चसन्धयः सन्निवेशः भवन्ति । यथा - प्रथमाङ्के मुखसन्धिः, द्वितीयाङ्के तृतीयाङ्के च प्रतिमुखसन्धिः, चतुर्थाङ्के पञ्चामाङ्के च गर्भसन्धिः, षष्टाङ्के विमर्शसन्धिः, सप्तमाङ्के च निर्वहणसन्धेः सन्निवेशः वर्तते ।२

वलासादेः वर्णनम्

अभिज्ञानशाकुन्तले नानाप्रकारकं विलासादीनां समृद्धिनां च वर्णनेन साकं अद्भुतः रसस्य तथा आश्चर्यस्यापि वर्णनं वर्तते ।३

भावः रसः च

अस्य नाटकस्य अङ्गीरसरूपेण शृङ्गाररसः अपि चेत् अत्र करूणः, वात्सल्यः, भयानकः प्रभृति अन्येषां रसानां अङ्गीरसरूपेण वर्णनं भवति ।४

अङ्क

नाटकस्य लक्षणनुसारमं नाटके पञ्चादयोः दशपराः अङ्कानां समावशेः भवेत् ।

अभिज्ञानशाकुन्तले सप्तसंख्यकाः अङ्काः वर्तन्ते। ५

नायक

अभिज्ञानशाकुन्तलनाटकस्य नायकः दुष्यन्तः, नायकश्रेणीषु धीरोदात्तः नायकः तथा प्रख्यातः पुरूरवंशस्य दायादः अदिव्यनायकः भवति ।६

अङ्गीरसः

नाटकस्य लक्षणनुसारं वीरः अथवा श्रृङ्गाररसः मध्यात् एकः अङ्गीरसः भवेत्। अस्य नाटकस्य अङ्गीरसः श्रृङ्गाररसः एव वर्तते ।७

निर्वहण सन्धौ अद्भुतघटनायाः वर्णनम्-

अस्य नाटकस्य सप्तमाङ्के निर्वहणसन्धेः सन्निवेशः वर्तते। अस्मिन् अङ्के राजा दुष्यन्तः देवासुरसंग्रामे असुराणां विनाशं कृत्वा यत् विजयलाभं कृतमस्ति वास्तवरूपेण आश्चर्यजनकः एव। द्वितीयः मरीचाश्रमे उभयोः दुष्यन्तशकुन्तलयोः यत् नाटकीय मिलनम् अभवत् तत् अपि अलौकिकः ।८

एतत् सर्वम् आलङ्कारिकदृष्ट्या विश्लेषणेन ज्ञायते अभिज्ञानशाकुन्तलं संस्कृतनाट्यसाहित्यस्य आलोकवार्तिका एव इति ।

अभिज्ञानशाकुन्तलस्य नान्दीविश्लेषणम् - साहित्यदर्पणकारस्य मतानुसारम् –

आशीर्वचन संयुक्ता स्तुतिर्यस्मात् प्रयुज्यते ।
देवद्विज नृपादीनां तस्मानान्दीति संज्ञिता ।।
माङ्गल्यशङ्खचन्दाब्जकोककैरवशसिंनी ।
पदैर्युक्ता द्वादशभिरष्टाभार्वा पदैरूतः ।।९

अर्थात् देवः द्विजः नृपादयः प्रभृतयः आशीर्वचनयुक्तं स्तुतिविधानः यत्र क्रियते तत् नान्दी इत्यभिधीयते। इयं नान्दी शङ्खः, चक्र, पद्मं, कोकः, कैरवादीनां मङ्गलवाचकपसानां प्रकाशः करणीयः । इयं नान्दी द्वादशपदविशिष्टम् अष्टपदविशिष्टं वा भवति। अभिज्ञानशाकुन्तलस्य नान्दी श्लोकः अष्टपदविशिष्टः भवति यथा -
या सृष्टिः स्रष्टुराद्या वहति विधिहुतं या हविर्या च होत्री ये द्वे कालं विधत्तः श्रूतिविषयगुणा या स्थिता व्याप्य विश्वम्

यामाहुः सर्वबीजप्रकृतिरिति यया प्राणिनः प्राणवन्तः
प्रत्यक्षाभिः प्रपन्नस्तनुभिरवतु वस्ताभिरष्टाभिरीशः ॥ १०

त्रिविधम् मङ्गलाचरणम् मध्यात् अत्र आशीर्वादात्मकं मङ्गलाचरणं भवति। अस्मिन् नान्दीश्लोके नाटके वर्णितः मूख्यपात्राणां तथा मूख्यकथावस्तोः संक्षिप्तवर्णनं हेतोः इयं पत्रावलीनान्दी इति कथ्यते ।

अभज्ञानशाकुन्तले पञ्चसन्धयः
आलङ्कारिकाणां मतानुसारं नाटके पञ्चसन्धीनां समावेशः भवेत्। अतः कथ्यते- नाटकं ख्यातवृत्तं स्यात् पञ्च सन्धि समन्वितम् ।११
महाकविः कालिदासः अभिज्ञानशाकुन्तलेऽपि पञ्चसन्धयः सन्निवेशः कृतमस्ति। यथा तानि मुखसन्धिः, प्रतिमुखसन्धिः, गर्भसन्धिः, विमर्शसन्धिः, निर्वहृ सन्धिः च । अभिज्ञानशाकुन्तले एतेषां सन्धीना समावेशः अत्र परिलक्षितः-

१_मुखसन्धिः

यत्र वीजसमुत्पत्तिर्नानार्थरससम्भवा
प्रारम्भेण समायुक्ता तन्मुखं परिकीर्तितम् ।।१२

अनेकार्थवृत्तान्तरससम्बन्धत्वे सति प्रारम्भावस्था योगित्वे सति बीजोत्पतिमत्वं मुखसन्धेः लक्षणम्। मुखसन्धेः लक्षणानुसरम् अभिज्ञानशाकुन्तस्य प्रथमाङ्के मुखसन्धिः भवति। यतः अस्मिन् अङ्के दुष्यन्तशकुन्तलयोः मिलनरूपकं फले उभयोः अनुरागरूपकः वीजः अङ्कुरितः अभवत्। क्रमशः अयम् अनुरागः विसर्पणः प्रसारः वा अभवत्। अतः उभयोः अनुरागरूपकः वीजस्य उत्पत्तिः अस्मिन् प्रथमाङ्के अभवत् अत्र मुखसन्धिः। १३

अभिज्ञानशाकुन्तलस्य प्रारम्भात् यथा - सूतः-

कृष्णसारे ददच्चक्षुस्त्वयि चाधिज्यकार्मु के ।
मृगानुसारिणां साक्षात् पश्यामीव पिनाकिनम् ।।

इति श्लोकात् आरभ्यः द्वितीयाङ्कस्य " विदूषकः- कृतं भवता निर्मक्षिकम् । साम्प्रतमेतस्मिन् पादपच्छायाविरचितवितानसनाथे शिलातले निषीदतु भवान् यावदहमपि सुखासीनो भवामि। राजा - गच्छाग्रतः । विदूषकः- एतु भगवान् । इत्युभौ परिक्रम्यौपविष्टौ ।।१४

इति उक्तिः पर्यन्तं मुखसन्धिः भवति।

२_ प्रतिमुखसन्धिः

फलप्रधानोपयस्य मुखसन्धि निवेशिनः।
लक्ष्यालक्षयीवोद्भेदः यत्र प्रतिमुखं हि तत् ।।

अर्थात् यत्र मुखसन्धिनिविष्टफलस्य मुख्यहेतोः ईषत् प्रकाशितम् भवति तत्र प्रतिमुखसन्धिः भवति। अस्य लक्षणानुसारम् अभिज्ञानशाकुन्तलस्य द्वितीयाङ्कस्य "राजा माधव्य !

अनवाप्तचक्षुःफलोऽसि येन त्वया दर्शनीयं न दृष्टम्। विदुषक- ननु भवान् अग्रतो मे वर्तते ।राजा -सर्वं कान्तम् आत्मीयं पश्यति । अहं तु ताम् आश्रमललामभूतां शकुन्तलामधिकृत्य ब्रवीमि । ......."आरभ्यः "राजा - अहो विघ्रवत्यः पार्थिताऽर्थसिद्धयः मया हि - मुहुरङ्गु लिंसवृताधरो

प्रतिषेधाक्षरविक्लवाभिरामम् ।
मुखमंसविवर्ति न चुम्वितं तु ।।

क्व न खलु सम्प्राते गच्छामि ।अथवा इहैव प्रियापरिभुक्तमुक्ते लतावलये मुहुर्त्तं स्थास्यमि ।(सर्वतोऽवलोक्य)

तस्याः पुष्पमयी शरीरलुलिता शाय्या शिलायामियं
क्लान्ते मन्मथलेख एष नलिनीपत्रे नखैर्पितः ।
हस्तात् भ्रष्टमिदं विसाभरणमित्यासज्जमानेक्षणो
निर्गुन्तुं सहसा न वेतसगृहादीशोऽस्मि शून्यादपि।।

सायन्तने हवनकर्म्मणि संप्रवृते
वेदिं हुताशनवतीं परितः प्रकीर्णाः
छायाश्चरन्ति बहुधा भयमादधानाः
सन्धापयोदकपिशाः पिशिताऽशनानाम् ।।

राजा- भोः भोः ! मा भैषीः मा भैषीः अहमागच्छामि । (निष्क्रान्तः)" इत्यादिः तृतीयाङ्कस्य अन्तिम पर्यन्तं प्रतिमुखसन्धिः ।१५

३_ गर्भसन्धिः

फलप्रधानोपयस्य प्रागुद्भिन्नस्य किन्चन ।
गर्भ यत्र समुद्भेदो ह्रासान्वेषणवान् मुहुः ।।

पूर्वसन्धिद्वये किञ्चिदुदभिन्नस्य मुख्यप्रयोजनं पति प्रधानस्य मुहुर्मुहुः ह्रासाप्रकाशवान् समुद्भेव भवति तत्र गर्भसन्धिः भवति । अभिज्ञानशाकुन्तलं नाटकस्य चतुर्थाङ्कस्य प्रारम्भात् यथा - " अनसूया - हला प्रियंवदा यद्यपि गान्धर्वेण विधिना निवृतकल्याणा शकुन्तलाऽनुरूपभर्त्तृगामिनी संवृत्तेति निर्वृत्तं मे हृदयं तथाप्येतावच्चिन्तनियम् । प्रियंवदा कथमिव । अनसूया-अद्य स रार्षिरिष्टिं परिसमाप्यर्षिभिसर्जित आत्मानो नगरं प्रविश्यान्तः पुषसमागत इतोगतं वृत्तान्तं स्मरति वा न वेति।..........." इति आरभ्यः पञ्चमाङ्कस्य " राजा - किमत्र भवति मया परिणीतपूर्वा । शकुन्तला - (सविषादम् । आत्मगतम्) हृदयं! साम्प्रतं ते आशङ्का । शाङ्गरवः - किं कृतकार्यद्वेषो धर्मं प्रति विमुखता कृतावज्ञा । राजा कुतोऽयमसत्कल्पनाप्रश्नः । शाङ्गरवः-मूर्च्छन्त्मी विकाराः प्रायेणैश्वर्यमतेषु । राजा विशेषेणाधिक्षिप्तोऽस्मि। (इति यथोक्तं करोति ।) "पञ्चमाङ्कस्य अंशं पर्यन्तं गर्भसन्धिः भवति।१६

४_ वमर्शसन्धिः

यत्र मख्यफलोपायो उद्भिन्नो गर्भतोऽधिकः।
शापाद्यैः सान्तरायश्च सविमर्ष इति स्मृतः ।।

गर्भसन्ध्यपेक्षयाधिकं प्रकाशितस्य प्रधानप्रयोजनस्य हेतुः पात्रैः कर्तव्यमिति विमर्शसन्धिः । अभिज्ञानशाकुन्तलस्य पञ्चमाङ्कस्य " राजा- (शकुन्तलां निर्वण्य । आत्मगतम्)।

इदमुपनतमेव रूपमक्लिष्टकान्ति
प्रथमपरिगृहीतं स्यान्न वेत्यव्यवस्यन् ।
भ्रमर इव विभाते कुन्दमन्तस्तुषारं
न च खलु परिभोक्तुं नापि शक्नोमि भोक्तुम् ।।

५_ निर्वहणसन्धिः

निर्वहणसन्धिम् उपसंहृतिसन्धिः अपि कथ्यते ।

पादीपणीः

1. अभि.शा.पृ.०९
2. अभि.शा.पृ.०९
3. अभि.शा .पृ.०९
4. अभि.शा.पृ .१०
5. अभि.शा.पृ .१०
6. अभि.शा.पृ .१०
7. अभि.शा.पृ .१०
8. अभि.शा.पृ .१०
9. सा.द.६/२४-२५
10. अभि.शा . श्लोक १/१
11. सा.द.६/७
12. अभि.शा १अङ्क -२अङ्क
13. अभि.शा पृ ५८
14. अभि.शा पृ ५९
15. अभि.शा पृ ५९-६०
16. अभि.शा पृ ६०

सहायकग्रन्थसूच


1. अलङ्कारप्रदिपः विश्वेश्वर पण्डितः, वारणासी, 221001 ।
2. अलङ्कारशास्त्रेतिहास, ISBN–३०२००१ ।
3. संस्कृत -वाङ्मय का वृहत् इतिहास,प्रकासन-ड. सच्चिदानन्द पाठक ।
4. संस्कृतसाहित्य इतिहास, आचार्य रामचन्द्र मिश्र, चौखम्वा संस्कृत प्रतिष्ठान ।
5. साहित्यदर्पण, प्रो. सूर्य्यमणिरथः साम्वेदि प्रकाशन ISBN-१७८८१-९३०७७०-५-४,पुरी
6. काव्यप्रकाश, प्रो, सूर्य्यमणिरथ, पुरी
7. अभिज्ञानशाकुन्तलम् प्रो हरेकृष्ण शतपथी, प्रकाशन किताव महल